| | | | |
|---|---|---|---|
| तक्षितः-तम्, | तक्षितः, | तितक्षिषितः, | तातक्षितः-तवान्; |
| तक्षः, | तक्षः, | तितक्षिषुः, | तातक्षः; |
| तक्षितव्यम्, | तक्षयितव्यम्, | तितक्षिषितव्यम्, | तातक्षितव्यम्; |
| तक्षणीयम्, | तक्षणीयम्, | तितक्षिषणीयम्, | तातक्षणीयम्; |
| तक्ष्यम्, | तक्ष्यम्, | तितक्षिष्यम्, | तातक्ष्यम्; |
| ईषत्तक्षः-दुस्तक्षः-सुतक्षः; | | — | — |
| तक्ष्यमाणः, | तक्ष्यमाणः, | तितक्षिष्यमाणः, | तातक्ष्यमाणः; |
| तक्षः, | तक्षः, | तितक्षिषः, | तातक्षः; |
| तक्षितुम्, | तक्षयितुम्, | तितक्षिषितुम्, | तातक्षितुम्; |
| [1]तक्षा, | तक्षणा, | तितक्षिषा, | तातक्षा; |
| तक्षणम्, | तक्षणम्, | तितक्षिषणम्, | तातक्षणम्; |
| तक्षित्वा, | तक्षयित्वा, | तितक्षिषित्वा, | तातक्षित्वा; |
| सन्तक्ष्य, | सन्तक्ष्य, | सन्तितक्षिष्य, | सन्तातक्ष्य; |
| तक्षम् २, तक्षित्वा २, | तक्षम् २, तक्षयित्वा २, | तितक्षिषम् २, तितक्षिषित्वा २, | तातक्षम् २; तातक्षित्वा २. |

## (692) "तक्षू तनूकरणे" (I-भ्वादिः-655. सक. वेट्. पर.)

'तनूकरणम्=स्थूलस्य काष्ठादेः कतिपयावयवापनयनेन सूक्ष्मीकरणम्' इति बालमनोरमा ॥

'स्यात् तक्षतीति त्वचनेऽथ वा श्नौ तक्ष्णोति तक्षेच्च तनूक्रियायाम्।'
(श्लो. 183) इति देवः।

तक्षकः-क्षिका, तक्षकः-क्षिका, तितक्षिषकः-[2]तितक्षकः-क्षिका, तातक्षकः-क्षिका;
[3]तक्षिता-त्री-तष्टा-ष्ट्री, तक्षयिता-त्री, तितक्षिषिता-तितक्षिता-त्री, तातक्षिता-त्री;

---

1. 'गुरोश्च हलः' (3-3-103) इत्यकारप्रत्ययः।
2. ऊदित्त्वादिड्विकल्पः। इडभावपक्षे, 'स्कोः—' (8-2-29) इति झल्निमित्तके कलोपे, 'षढोः कः सि' (8-2-41) इति षकारस्य ककारादेशे, 'आदेशप्रत्ययोः' (8-3-59) इति सनः सकारस्य षत्वे च **तितक्षकः** इति रूपम्। एवं सर्वत्रेडभावपक्षे सन्नन्ते प्रक्रिया ज्ञेया।
3. ऊदित्त्वेनेड्विकल्पः। तेन रूपद्वयम्। इडभावपक्षे 'स्कोः—' (8-2-29) इति कलोपे, 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वे च रूपम्। एवं तव्यदादिष्वपि ज्ञेयम्।